अनुक्रमांकः ....................................
निरीक्षकस्य हस्ताक्षरम् ........................

**Paper Code**
**BV-304**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – दिसम्बरमासः – 2018**

**बी. ए. व्याकरणम् (सत्रम् : तृतीयम्)**

**संस्कृतम्**

**चतुर्थपत्रम्–वैदिकसिद्धान्तपरिचयः**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

**अवधेयम्** : प्रश्नपत्रमिदं 'क, ख, ग' इति खण्डत्रये विभक्तमस्ति। प्रतिखण्डम् अङ्कनिर्धारणं तत्रैव द्रष्टुं शक्यते। प्रतिखण्डं प्रदत्तानां निर्देशानामनु-सरणपुरस्सरमेव प्रश्नानामुत्तराणि लेखनीयानि 'सर्वे प्रश्ना अनिवार्याः'।

## (खण्ड – "क" यजुर्वेदः) 20 अङ्काः

**प्रश्नः1– पुरुषसूक्तस्य स्मृताः केचन पञ्च मन्त्रा लेखनीयाः –** **(1X5=05)**

**प्रश्नः2– पृष्टेषु प्रश्नेषु चतुर्णां मन्त्राणां शब्दार्थपुरस्सरं स्वशब्दैरर्थबोधनं करणीयम् –** **(2.5X4=10)**

(क) एतावानस्य महिमातो ज्यायाँश्च परुषः।
पदोस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि।।

(ख) चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत।
श्रोत्राद्वायुश्च प्राणश्च मुखादग्निरजायत।।

(ग) प्रजापतिश्चरति गर्भेऽअन्तर जायमानो बहुधा विजायते।
तस्य योनिं परि पश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवनानि विश्वा।।

(घ) यत्पुरुषं व्यदधुः कतिधा व्यकल्पयन्।
मुखं किमस्यासीत्किं बाहू किमूरू पादाऽउच्येते।।

(ङ) तस्माद्यज्ञात्सर्वहुतः सम्भृतं पृषदाज्यम्।
पशूँस्ताँश्चक्रे वायव्यानारण्या ग्राम्याश्च ये।।

**प्रश्नः3– पृष्टानां मन्त्राणामृषिदेवताछन्दांसि ज्ञापनीयानि।** **(1X5=05)**

(क) त्रिपादूर्ध्व उदैत्पुरुषः॰ ...............................।
(ख) तं यज्ञं बर्हिषि॰ .......................................।
(ग) यज्ञेन यज्ञमयजन्त देवाः॰ ..................।
(घ) अद्भ्यः सम्भृतः पृथिव्यै॰ ...................।
(ङ) श्रीश्च ते लक्ष्मीश्च ते॰ .......................।

## (खण्ड – "ख") 25 अङ्काः
## (सांख्यकारिका)

**प्रश्नः1– पृष्टयोरेकस्याग्रे पञ्चकारिका लेखनीयाः।** **(2X5=10)**

(क) कारणमस्त्यव्यक्तं प्रवर्तते त्रिगुणतः समुदायाच्च।
परिमाणतः सलिलवत् प्रतिप्रतिगुणाश्रयविशेषात्।।

(ख) स्वालक्षणं वृत्तिस्त्रयस्य सैषा भवत्यसामान्या।
सामान्यकरणवृत्तिः प्राणाद्या वायवः पञ्च।।

**प्रश्नः2- अधोलिखिताना पञ्चानां कारिकाणाम् अर्थो ज्ञापनीयः।** **(3X5=15)**

(क) पूर्वोत्पन्नमसक्तं, नियतं, महदादि सूक्ष्मपर्यन्तम्।
संसरति निरुपभोगं भावैरधिवासितं लिङ्गम्।।

(ख) संघातपरार्थत्वात्, त्रिगुणादिविपर्ययादधिष्ठानात्।
पुरुषोऽस्ति, भोक्तृभावात्, कैवल्यार्थं प्रवृत्तेश्च।।

(ग) असदकरणादुपादानग्रहणात्, सर्वसम्भवाभावात्।
शक्तस्य शक्यकरणात्, कारणभावाच्च सत् कार्यम्।।

(घ) उभयात्मकमत्र मनः सङ्कल्पकमिन्द्रियञ्च, साधर्म्यात्।
गुणपरिणामविशेषान्नानात्वं बाह्यभेदाश्च।।

(ङ) प्रीत्यप्रीति-विषादात्मकाः, प्रकाश-प्रवृत्ति-नियमार्थाः।
अन्योऽन्याऽभिभवाऽऽश्रय-जनन-मिथुनवृत्तयश्च गुणाः।।

## (खण्ड - "ग") 25 अङ्काः

## (प्रश्नोपनिषद्)

**प्रश्नः1- प्रश्नोपनिषदि स्मृताः केचन पञ्च मन्त्रा लेखनीयाः।** **(2X5=10)**

**प्रश्नः2- निम्नलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानां समाधानं कर्त्तव्यम्।** **(3X5=15)**

(क) अत्रोपनिषदि कस्तृतीयः प्रश्नः ?

(ख) प्राणस्य स्वरूपं वर्णयन्तु ।

(ग) 'कस्मिन्नु सर्वे सम्प्रतिष्ठिता भवन्ति'? इत्यस्य प्रश्नस्य समाधानं करणीयम् ।

(घ) प्राणेन्द्रिययोर्मध्ये कः श्रेष्ठः? सकथानका व्याख्या करणीया ?

---------------x---------------